1

Page No. ____
Date

त्रैमासिक परीक्षा – 2 प्रश्न शीट
कक्षा – अष्टमी
विषय – संस्कृत

(खण्ड – क)

प्र०-1 अपठित गद्यांश (कोई एक करें) (4X4)

शरीरस्य नीरोगतायाः बहूनि साधनानि सन्ति। तेषु व्यायामस्य महत्वपूर्णं स्थानम् अस्ति। शरीरस्य आरोग्यार्थं प्रतिदिनं यथाविधि व्यायामः करणीयः। शरीरबलप्राप्तेः प्रधानं साधनम् अपि व्यायामः एव वर्तते। व्यायामशीलः जनः परिश्रमात् न कदापि विरतो भवति। व्यायामस्य प्रभावेण अल्पकाले अपि सः साहसं न त्यजति। अपूर्वया प्राणशक्त्या सः आपदः दूरीकरोति। उक्तञ्च- "प्रथमं सुखं शरीरारोग्यम्"

**(क) एकपदेन उत्तरत** (एक पद में उत्तर दीजिए)

1. शरीरस्य आरोग्यार्थं **प्रतिदिनं** कः करणीयः?
2. व्यायामशीलः जनः **कस्मात्** न विरमति?

**(ख) पूर्णवाक्येन उत्तरत** (पूरे वाक्य में उत्तर दीजिए)

1. शरीरं नीरोगं कथम् भवति?
2. कस्य प्रभावेण अल्पकाले अपि सः **साहसं न त्यजति**।

**(ग) निर्देशानुसारम् उत्तरत** (निर्देश के अनुसार उत्तर दीजिए)

1. '**बहूनि साधनानि**' अत्र विशेषणपदम् किम् अस्ति?

   (क) बहूनि  (ख) बहवः  (ग) साधनानि  (घ) साधनम्

2. '**नीरोगतायाः**' इति पदस्य विभक्तिं लिखत।

   (क) तृतीया  (ख) द्वितीया  (ग) षष्ठी  (घ) सप्तमी

2

कः न जानाति ए. पी. जे. अब्दुलकलामस्य नाम। सः भारतस्य प्रमुखः वैज्ञानिकः अस्ति। तस्यैव नेतृत्वे भारतम् अग्नि-पृथिवी आदीनि प्रक्षेपणास्त्राणि अमुञ्चत्। आणविक-अस्त्राणां विस्फोटने अपि तस्य प्रमुखं योगदानम् आसीत्। सः भारतस्य पूर्वराष्ट्रपतिः अपि अस्ति। भारतस्य प्रगतिर् एव तस्य लक्ष्यम्। सः न केवलं स्वदेशस्य युववर्गस्य अपितु प्रत्येकं नागरिकस्य प्रेरणास्रोतः अस्ति।

(I) एकपदेन उत्तरत।

(क) भारतस्य प्रमुख वैज्ञानिकः कः अस्ति?

(ख) भारतस्य प्रमुख प्रक्षेपास्त्राणि के सन्ति?

(II) **पूर्णवाक्येन उत्तरत।**

(क) अब्दुल कलामस्य किम् लक्ष्यम् अस्ति?

(ख) अब्दुलकलामः कस्य प्रेरणास्रोतः अस्ति?

(III) **विशेषणपदं लिखत।**

.................... वैज्ञानिकः .................... राष्ट्रपतिः ____

3

भारतस्य सर्वासु नदीषु गङ्गा पवित्रतमा श्रेष्ठा च अस्ति। इयं हिमालयस्य गोमुख-स्थानात् निर्गच्छति। पर्वतेभ्यः निसृत्य गङ्गा हरिद्वारे समतलं भू-भागं प्रविशति। हरिद्वार-तीर्थे प्रतिवर्षं लक्षाधिकाः जनाः गच्छन्ति, गङ्गायाः शीतले जले स्नानं च कुर्वन्ति। परम् अद्यत्वे एषा पावनी नदी प्रदूषिता। यत्र-तत्र जल-मालिन्यम् अस्ति। जीवनस्य रक्षायै जलम् अनिवार्यम्। गङ्गानद्याः रक्षा अस्माकं कर्तव्यम्।

**एकपदेन उत्तरत—**

(i) गङ्गा कस्मिन् स्थाने समतलं भू-भागं प्रविशति?

(ii) जीवनस्य रक्षायै किम् अनिवार्यम्?

**पूर्णवाक्येन उत्तरत—**

(i) अद्यत्वे गङ्गा कीदृशी अस्ति?

(ii) अस्माकं कर्तव्यं किम् अस्ति?

**निर्देशानुसारम् उत्तरत—**

(i) 'नदीषु' इति पदस्य विशेषण-पदं किम्?

(क) गङ्गा (ख) सर्वासु (ग) पवित्रतमा

(ii) 'प्रविशति' इति क्रियापदस्य कर्तृपदं किम्?

(क) भूभागम् (ख) समतलम् (ग) गङ्गा

4

श्रीमती सरोजिनी नायडू 1879 तमे वर्षे फरवरी मासस्य त्रयोदश्यां तिथौ जन्म अलभत। इयं स्व-राष्ट्रं बहु असेवत। त्रयोदशवर्षीया इयं स्वतन्त्रता-सङ्ग्रामे अकूर्दत् कारागारमप्यगच्छत्। विदुषीयं प्रियवादिनी गायिका च आसीत्। इयमेव 'भारत-कोकिला' इति उपाधिम् अविन्दत्। अस्याः काव्य-रचनायां सर्वत्र राष्ट्रभक्तिः दृश्यते। सरोजिनी नायडू महोदया स्वतन्त्रभारते उत्तर-प्रदेशे सर्वप्रथमं राज्यपालपदम् अशोभयत्।

**एकपदेन उत्तरत—**

(i) सरोजिनी नायडू काम् उपाधिम् अविन्दत्?

(ii) सा कुत्र राज्यपालपदम् अशोभयत्?

**पूर्णवाक्येन उत्तरत—**

सरोजिनी नायडू कदा स्वतन्त्रता-सङ्ग्रामे अकूर्दत्?

निर्देशानुसारम् उत्तरत—

(i) 'दृश्यते' [illegible] पदस्य कर्तृपदं किम्?

(क) [illegible] (ख) अस्याः (ग) राष्ट्रभक्तिः

(ii) 'विदुषी' इति पदस्य विशेष्यपदं किम् अस्ति?

(क) [illegible] (ख) इयम् (ग) प्रियवादिनी

**5**

देहलीनगरं भारतस्य राजधानी अस्ति। एतत् नगरं यमुनानद्याः तीरे अस्ति। एतस्य पुरातनं नाम 'इन्द्रप्रस्थ' आसीत्। देहलीनगरे अनेकानि पुरातनानि नूतनानि च दर्शनीयानि स्थानानि सन्ति। तेषु 'अक्षरधाम' इति विश्वविख्यातं नूतन मन्दिरं, भारतीयसंस्कृतेः प्रदर्शनस्थानं च अस्ति। अत्र अतिविस्तृताः विपणयः अपि सन्ति। देहलीनगरं व्यापारस्य केन्द्रं, उद्योगस्थलम् अपि अस्ति। भारतस्य सञ्चालनं देहलीतः एव भवति। अतएव एतत् नगरं भारतस्य हृदयं कथ्यते।

◆ **एकपदेन उत्तरत।**

(क) भारतस्य राजधानी का?

(ख) देहल्याः पुरातनं नाम किम्?

◆ **पूर्णवाक्येन उत्तरत।**

अक्षरधाममन्दिरस्य का विशेषता अस्ति?

◆ **भाषिककार्यम्**

(क) "देहलीनगरं व्यापारस्य ...................... अस्ति।" अस्मिन् वाक्ये कर्ता कः?

(ख) "दर्शनीयानि स्थानानि" अत्र विशेषणं किम्?

**6**

केरलराज्यस्य संस्कृतिः प्राचीना अस्ति। अत्र नैकाः उत्सवाः आचर्यन्ते। ओणम तु केरलराज्यस्य प्रमुखः उत्सवः। एतस्मिन् दिने महिलाः ओणपुक्कलम् अर्थात् पुष्पाणां रङ्गवल्लीम् रचयन्ति। तद्दिने आडाप्रधमनस्य (खीर) वितरणम् अपि भवति। एतस्मिन् दिने विभिन्नानाम् कार्यक्रमाणां, प्रतियोगितानां नृत्यानां चायोजनं भवति। 'कथकली' तु परम्परागतं नृत्यमस्ति। तत्र शृङ्गारस्य वेषभूषायाः विशिष्टं महत्त्वमस्ति। सम्प्रति नौकाविहारः लोकप्रियः अस्ति। धावनक्रीडायां श्रेष्ठतमा पी.टी. उषा केरलराज्यस्य एव अस्ति।

◆ **एकपदेन उत्तरत।**

(क) केरलराज्यस्य प्रमुखः उत्सवः कः? (ओणपुक्कलम्/ओणम्)

(ख) महिलाः केषां रङ्गवल्लीम् रचयन्ति? (पुष्पाणां/वर्णानाम्)

◆ **पूर्णवाक्येन उत्तरत।**

'कथकली' नृत्ये कस्य विशिष्टं महत्त्वम् अस्ति?

**भाषिककार्यम्।**

(क) "केरलराज्यस्य संस्कृतिः प्राचीना अस्ति।" इत्यस्मिन् वाक्ये विशेषणं किम् अस्ति?

(ख) "सम्प्रति नौकाविहारः लोकप्रियः अस्ति" इत्यस्मिन् वाक्ये किम् अव्ययपदं प्रयुक्तम्?

अयम् मम विद्यालयः। अस्य भवनं अतिविशालम्। अस्य विद्यालयस्य सर्वे अध्यापकाः योग्याः निपुणाः च सन्ति। सर्वे छात्राः अपि मनोयोगेन पठन्ति। अत्र अध्यापकाः स्नेहेन छात्रान् पाठयन्ति। अस्मिन् विद्यालये एकः भव्यः पुस्तकालयः अस्ति यत्र छात्राः पुस्तकानि समाचारपत्राणि च प्राप्नुवन्ति। अस्य विद्यालयस्य परीक्षाफलं प्रशंसनीयं भवति। अत्र अध्ययने वयं गौरवम् अनुभवामः।

- **एकपदेन उत्तरत।**
  - (क) विद्यालयस्य भवनं कीदृशम् भवति? (विशालम्/अतिविशालम्)
  - (ख) विद्यालयस्य परीक्षाफलं कीदृशं भवति? (प्रशस्तं/प्रशंसनीयं)
- **पूर्णवाक्येन उत्तरत।**
  विद्यालयस्य अध्यापकाः कीदृशाः सन्ति?
- **भाषिककार्यम्**
  - (क) 'भव्यः पुस्तकालयः' अनयोः विशेषणपदं किम्?
  - (ख) 'सर्वे छात्राः अपि मनोयोगेन पठन्ति।' इति वाक्ये 'पठन्ति' क्रियापदस्य कर्तृ पदं किम् अस्ति? (छात्राः/मनोयोगेन)

कस्मिंश्चित् वने खरनखरः नाम सिंहः प्रतिवसति स्म। सः कदाचित् इतस्ततः क्षुधार्तः न किञ्चिदपि आहारं प्राप्तवान्। ततः सूर्यास्तसमये एकां महतीं गुहां दृष्ट्वा सः अचिन्तयत्–'नूनम् एतस्यां गुहायां रात्रौ कोऽपि जीवः आगच्छति। अतः अत्रैव निगूढो भूत्वा तिष्ठामि' इति। एतस्मिन् अन्तरे गुहायाः स्वामी दधिपुच्छः नाम शृगालः समागच्छत्। स च यावत् पश्यति तावत् सिंहः पदपद्धतिः गुहायां प्रविष्टा दृश्यते, न च बहिरागता।

**(क) एकपदेन उत्तरत –**

(*i*) सिंहस्य किम् नाम आसीत्?

(*ii*) सिंहः कुत्र अतिष्ठत्?

**(ख) पूर्णवाक्येन उत्तरत–**

(*i*) गुहां दृष्ट्वा सिंहः किम् अकरोत्?

**(ग) यथानिर्देशम् उत्तरत–**

(*i*) प्राप्तवान् इति पदस्य किं प्रत्ययः?

(अ) तुमुन् (ब) ल्यप (स) क्त्वा (द) क्तवतु

(*ii*) गुहायाः इति पदस्य का विभक्ति?

(अ) प्रथमा (ब) द्वितीया (स) तृतीया (द) पञ्चमी/षष्ठी

Date : / /
Page No.

9\. भारतस्य राजधानी दिल्ली – नाम्ना प्रसिद्धा अस्ति। अस्याः प्राचीनं नाम इन्द्रप्रस्थम् अस्ति। 'नवा दिल्ली' इति स्थाने केन्द्रीयप्रशासनस्य कार्यालयाः सन्ति तत्र बहुभूमिकानि भवनानि विलसन्ति। दिल्ली सर्वस्य आकर्षण केन्द्रम् अस्ति। अत्र दूरदर्शनस्य अपि केन्द्रम् अस्ति। दिल्ली शिक्षायाः अपि प्रमुखं केन्द्रं वर्तते। दिल्लीनगर्यां दर्शनीयस्थानेषु मेहरौलीस्तम्भः, राष्ट्रपतिभवनम्, अद्भुतालयः, जन्तुगृहं, रक्तदुर्गः च सन्ति। दिल्ली भारतस्य हृदयं वर्तते।

(क) एकपदेन उत्तरत –

(i) भारतस्य राजधानी का अस्ति?

(ii) दिल्लयाः भारतस्य प्राचीनं नाम किम् आसीत्?

(ख) पूर्णवाक्येन उत्तरत–

(i) दिल्ली कस्य हृदयं वर्तते?

(ग) यथा निर्देशम् उत्तरत–

(i) 'सन्ति' इति क्रियापदस्य किं कर्तृपदम् अत्र अस्ति?

(अ) कार्यालयाः (ब) सांसदाः (स) भवनानि (द) राष्ट्रपतिः

(ii) दिल्ली शिक्षायाः अपि प्रमुखं केन्द्रं वर्तते। अस्मिन् वाक्ये किम् अव्ययपदम् प्रयुक्तम्?

(अ) दिल्ली (ब) शिक्षायाः (स) अपि (द) केन्द्रं

10\. भारतीयसंस्कृतिः संस्कृतभाषायाम् आश्रिता अस्ति। भारतस्य आत्मा संस्कृत्या प्रकाशते। संस्कृतभाषायाः पुनरुज्जीवनं तदा भविष्यति यदा जनजीवनस्य प्रत्येके क्षेत्रे संस्कृतस्य प्रयोगः भवेत्। संस्कृतभाषा यदा भारतस्य व्यवहारभाषा आसीत् तदा भारतं 'विश्वगुरुः' इति ख्यातिम् अलभत। विदेशेभ्यः छात्राः अत्र अध्ययनार्थम् आगच्छन्ति स्म। नालन्दा-तक्षशिलादि-विश्वविद्यालयेषु विविधानि शास्त्राणि तेभ्यः पाठ्यन्ते स्म। पुनः विश्वगुरुत्वम् प्राप्तुं भारतेन संस्कृतस्य अवलम्बनं करणीयम् एव।

- **एकपदेन उत्तरत।**

(क) कस्य आत्मा संस्कृत्या प्रकाशते? (भारतीयस्य/भारतस्य)

(ख) विदेशेभ्यः छात्राः अत्र किमर्थम् आगच्छन्ति स्म? (अध्ययनार्थम्/पाठनार्थ)

- **पूर्णवाक्येन उत्तरत।**

संस्कृतभाषायाः पुनरुज्जीवनं कदा भविष्यति?

- **भाषिककार्यम्**

(क) 'भारतीयसंस्कृतिः संस्कृतभाषायाम् आश्रिता अस्ति' इति वाक्ये 'अस्ति' क्रियापदस्य कर्ता कः? (भारतीयसंस्कृतिः/संस्कृतभाषा)

(ख) 'विविधानि शास्त्राणि' इति पदयोः विशेषणम् किम्?

(खण्ड (ख)

प्र-2 पठित गद्यांश (4X1 = 4
पाठ 8 9, 10 में से गद्यांश का अभ्यास पाठ्य पुस्तक में से करें।

(खण्ड – ग)

प्र-3 निम्न शब्दों के अर्थ लिखो। ($\frac{1}{4}$X4 = 1)

पाठ – 8 (अस्माकं विद्यालय:)

| | |
|---|---|
| 1) विद्यालय: | 11) मञ्च |
| 2) नातिदूरम् | 12) उद्यानम् |
| 3) सम्पूर्ण देशे | 13) प्रकृते |
| 4) रमणीयं | 14) प्रसिद्ध: |
| 5) पुष्पाणि | 15) पुरस्कारं |
| 6. विभिन्न वर्णानि | 16) समाचारपत्राणि |
| 7) क्रीडा क्षेत्रम् | 17) अध्ययन |
| 8) परिसर: | 18) परीक्षाफलं |
| 9) प्रशिक्षित: | 19) व्यायामशिक्षिका: |
| 10) प्रशंसनीयं | 20) अनुशासनप्रिय: |

पाठ – 9 (प्रतापस्य देशभक्ति)

| | |
|---|---|
| 1) नृप | 11) सर्वा सम्पत्तिम् |
| 2) देशभक्त: | 12) वीरता |
| 3) पुरोहित: | 13) सञ्चार: |
| 4) सुविख्यात | 14) अश्रुणि |
| 5) सैनिका: | 15) शासनम् |
| 6) भटै: सैनिकै: | 16) अश्व: |
| 7) चिन्ता | 17) युद्धे |
| 8) प्रशंसति | 18) स्वतन्त्र: |
| 9) उषित्वा | 19) सेना |
| 10) प्रासादं | 20) पराजित: |

पाठ-10 (वृक्षाणां महत्त्वम्)

| | |
|---|---|
| 1) अभिनन्दन्ति | 11) पुण्यं कर्म |
| 2) फलानि | 12) आतपे |
| 3) शुद्धं | 13) सत्पुरुषा: इव |
| 4) मलिन: | 14) संकल्पा: |
| 5) युगं | 15) धूम: |
| 6) अवशोषयति | 16) उद्योगाना |
| 7) औषधानि | 17) प्रदूषित: |
| 8) गायन्ति | 18) जीवनं |
| 9) अन्यस्या | 19) मित्राणि |
| 10) वृक्षा: | 20) महत्त्वम् |

प्र० 3. निम्नलिखित उपसर्गों का अभ्यास करें। $(\frac{1}{4} \times 4 = 1)$

| | |
|---|---|
| 1) प्र | 12) आ |
| 2) परा | 13) नि |
| 3) अप | 14) अधि |
| 4) सम् | 15) अपि |
| 5) अनु | 16) अति |
| 6) अव | 17) अभि |
| 7) निस् | 18) सु |
| 8) निर् | 19) उत् |
| 9) दुस् | 20) प्रति |
| 10) दुर् | 21) परि |
| 11) वि | 22) उप |

Date : / /
Page No.

प्र०-5 आत्मनेपदी धातु रूप लड़् लकार लिखो (कोई एक) (3X1=3)
सेव्, लभ्

प्र०-6. निम्न दिए गए शब्द रूपों में से कोई एक करें। (6X1=6)
तद् (पुल्लिङ्ग) तद् (स्त्रीलिङ्ग)
तद् (नपुंसकलिङ्ग) यत् (पुल्लिङ्ग)
यत् (स्त्रीलिङ्ग) यत् (नपुंसकलिङ्ग)
इदम् (पुल्लिङ्ग) इदम् (स्त्रीलिङ्ग)
किम् (पुल्लिङ्ग) किम् (स्त्रीलिङ्ग)
अस्मद् (मैं, हम) युष्मद् (तू, तुम)

(खण्ड – घ)

पाठ – 8 (अस्माकं विद्यालय)

प्र० – 7 एक पद में उत्तर दीजिए (½ x 4 = 2)

प्र० – 1.) विद्यालयस्य पुरतः किम् अस्ति ?
प्र० – 2.) उद्याने कानि विकसन्ति ?
प्र० – 3.) कः छात्राणां सहायतां करोति ?
प्र० – 4.) के योग्याः सन्ति ?
प्र० – 5.) छात्राः कुत्र प्रार्थनां कुर्वन्ति ?
प्र० – 6.) अत्र समये – समये काः भवन्ति ?
प्र० – 7.) विद्यालये एकः विशालः कः अस्ति ?
प्र० – 8.) विद्यालयस्य परिसरः कीदृशी अस्ति ?
प्र० – 9.) तरणताले छात्राः प्रतिदिनं कस्य अभ्यासं कुर्वन्ति ?
प्र० – 10.) विद्यालयः कस्मात् नातिदूरम् अस्ति ?

पाठ – 9 (प्रतापस्य देशभक्ति)

प्र० – 1.) मेवाडस्य नृपः कः आसीत् ?
प्र० – 2.) अकबरस्य सेनया सह कः युद्धम् अकरोत् ?
प्र० – 3.) प्रतापस्य अश्वस्य नाम किम् आसीत् ?
प्र० – 4.) प्रतापस्य पार्श्वे कस्य अभावः आसीत् ?
प्र० – 5.) मेवाडस्य मन्त्री कः आसीत् ?
प्र० – 6.) प्रतापः कस्मै पारितोषिकं अयच्छत् ?
प्र० – 7.) सर्वे जनाः कस्य जयघोषं अकुर्वन् ?
प्र० – 8.) कस्य वीरतया मेवाडः पुनः स्वतन्त्रः अभवत् ?
प्र० – 9.) कः राजमुकुटं अधारयत् राजपुरोहितः च आशीर्वादं अयच्छत् ?
प्र० – 10.) वने उषित्वा कस्य स्वतन्त्रतायै प्रयत्नशीलः आसीत् ?

पाठ – 10 (वृक्षाणां महत्त्वम्)

प्र० – 1.) के अस्माकं मित्राणि सन्ति ?
प्र० – 2.) वृक्षाः केषाम् उपकारं कुर्वन्ति ?
प्र० – 3.) केभ्यः मलिनः धूमः निस्सरति ?

प्र०-4. वृक्षाः किम् न्यूनं कुर्वन्ति ?
प्र०-5) वृक्षाः किम् अवशोषयन्ति ?
प्र०-6. काः अस्मभ्यम् ऑक्सीजनवायुं यच्छन्ति ?
प्र०-7. भवनानां निर्माणाय जनाः केषाम् कर्तनं कुर्वन्ति ?
प्र०-8. अस्माभिः किम् कर्त्तव्यम् ?
प्र०-9. गृहस्य समीपे काः सन्ति ?
प्र०-10 जनाः वृक्षाणां कर्तनं किमर्थं कुर्वन्ति ?

पाठ – 8 (अस्माकं विद्यालयः)

प्र०-8. निम्न प्रश्नों के पूर्ण वाक्य में उत्तर लिखो। (कोई 2) (2x2=4)
प्र०-1 कुत्र अवस्थितः अयं विद्यालयः सम्पूर्णे देशे प्रसिद्ध ?
प्र०-2 उद्याने कानि विकसन्ति ?
प्र०-3. तरणताले छात्राः प्रतिदिनं किं कुर्वन्ति ?
प्र०-4. पुस्तकालये केषां पुस्तकानि सन्ति ?
प्र०-5 तरणे छात्राणां सहायतार्थं कौ स्तः ?
प्र०-6 विभिन्नासु क्रीडासु छात्राणां सहयोगं के कुर्वन्ति ?

पाठ – 9 (प्रतापस्य देशभक्ति)

प्र०-1. प्रतापः कदा कस्मिन् स्थाने च अकबरस्य सेनया सह युद्धम् अकरोत् ?
प्र०-2. सैनिकाः किमर्थं व्याकुलाः अभवन् ?
प्र०-3. प्रतापः किं कर्तुम् तत्परः आसीत् ?
प्र०-4. भामाशाहः किमर्थं सर्वां सम्पत्तिं प्रतापाय अयच्छत् ?
प्र०-5 प्रतापः धनेन किं अकरोत् ?
प्र०-6. मेवाडः पुनः कथं स्वतन्त्रः अभवत् ?

पाठ – 10 (वृक्षाणां महत्त्वम्)

प्र०-1. वृक्षाः अस्मभ्यं किं किं यच्छन्ति ?
प्र०-2 केषां निर्माणे वृक्षाः पादपाः च सहायकाः ?
प्र०-3 यदि वृक्षाः न स्युः तर्हि किं भवेत् ?
प्र०-4. जनाः किमर्थं वृक्षाणां कर्तनं कुर्वन्ति ?
प्र०-5 पूर्वं यत्र वनानि आसन् अद्य तत्र किम् अस्ति ?
प्र०-6. वृक्षाः अन्यस्य किं कुर्वन्ति ?

Page No.
Date

प्र०-7. किं वृक्षा: पर्यावरणं शुद्धं कुर्वन्ति ?
प्र०-8. वृक्षाणां रक्षणाय अस्माभि: किं करणीयम् ?

## अंक योजना

(खण्ड - क)
प्र०-1. अपठित गद्यांश (1×4 = 4)
(खण्ड - ख)
प्र०-2. पठित गद्यांश (1×4 = 4)
(खण्ड - ग) (व्याकरण)
प्र०-3 शब्दार्थ = $\frac{1}{4}\times 4 = 1$
प्र०-4 उपसर्ग = $\frac{1}{4}\times 4 = 1$
प्र०-5 धातु रूप लट् लकार (1×3 =3)
प्र०-6 शब्द रूप (1×6=6)
(खण्ड - घ)
प्र०-7 पाठ्य पुस्तक
एक शब्द में उत्तर वाले प्रश्न ($\frac{1}{2}\times 4 = 2$)
पूर्ण वाक्य में उत्तर वाले प्रश्न (2×2 = 4)

कुल अंक = 25